प्रविष्टा । व्याप्तिविशिष्टस्य हेतोः पक्षवृत्तिताकथन-
पूर्वकसाध्यविशिष्टपक्षबोधकवाक्यत्वं निगमनलक्षणम् ।
व्यापकाभाववत्त्वेन निर्णीते धर्म्मिणि व्याप्यस्याहार्य्या-
रोपात् व्यापकस्याहार्य्यारोपः तर्क इति तर्कलक्षणम्
यथा निर्वह्नित्वारोपान्निर्धूमत्वारोपः निर्वह्निः स्यान्निर्धू-
मः स्यादित्यादि । सन्दिग्धपक्षस्य साधनयुक्त्या प्रतिपक्षस्य
बाधनयुक्त्या च अर्थावधारणं निर्णय इति तल्लक्षणम् ।
इत्येते १मअ० १म आह्निके पदार्था दर्शिताः । वादादिल-
क्षणानि । तत्र प्रमाणतर्कसाधनोपालम्भः सिद्धान्तावि-
रुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः इति
वादलक्षणं प्रमाणतर्काभ्यां स्वपक्षस्य साधनं विपक्षस्योपा-
लम्भो दूषणं च यत्र । पक्षप्रतिपक्षौ विप्रतिपत्तिकोटी तयोः
परिग्रहः तत्साधनोद्देश्यकोक्तिप्रत्युक्तिरूपवाक्यवि-
शेषो वाद इति तदर्थः । छलजातिनिग्रहस्थाना-
दिकं विपक्षे समुद्भाव्य तस्य दूषणेन स्वपक्षस्थापन
वाक्यत्वं जल्पलक्षणम् । स्वपक्षस्थापनाराहित्येन परपक्ष-
निराकरणवाक्यत्वम् वितण्डालक्षणम् । सव्यभिचारविरुद्ध
प्रकरणसमसाध्यसमातीतकालरूपान् पञ्च हेत्वाभासान्
विभज्य तेषां लक्षणानि । वाद्युक्तवचनस्य अर्थान्तरपर-
त्वकल्पनेन युक्त्या तत्खण्डनं छलमिति छललक्षणम् । त-
च्च वाक्छलार्थच्छलोपचारच्छलभेदेन त्रिविधम् । व्याप्तिनिर-
पेक्षतया दूषणोक्तिर्जातिः तद्भेदाश्चतुर्विंशतिः ५ अ० वाच्याः ।
उद्देश्यानुगुणसम्यग्ज्ञानाभावलिङ्गत्वं निग्रहस्थानलक्षण
मिति १अ० २आह्निके एते पदार्था उक्ताः । संशयका-
रणादिनिरूपणम् प्रमाणात् प्रमेयसिद्धिः । प्रत्यक्षप्रमाण-
लक्षणे परिशिष्टविवेचनम् । मनसोऽणुत्वे ज्ञानायौगपद्यस्य
हेतुतयोक्तिः । प्रत्यक्षस्य क्वचिदनुमित्यात्मकताशङ्का-
यां तन्निराकरणम् । अवयवेभ्योऽवयविनोऽतिरिक्तता
साधनम् । अनुमानाप्रामाण्यशङ्कातन्निरासौ । वर्त्तमा-
नावस्थानिराकरणतत्स्थापने । उपमानाप्रामाण्यशङ्का
निराकरणे । अनुमाने उपमानस्य गतार्थत्वमाशङ्क्य
शाब्दबोधस्यानुमानेऽन्तर्भावमाशङ्क्य च तन्निवारणम् । सम-
क्तिकस्यैव शब्दस्य बोधकत्वव्यवस्थापनम् । दृष्टादृष्टार्थ-
कत्वेन शब्दद्वैविध्यम् । तत्रादृष्टार्थकस्य वेदशब्दस्य
अनृतव्याघातपुनरुक्तदोषेभ्यः अप्रामाण्यमाशङ्क्य युक्त्या
प्रामाण्यसमर्थनम् । विध्यर्थवादानुवादभेदात् ब्राह्मणरूप
वेदभागस्य त्रैविध्योक्तिः । विधिलक्षणम् । स्तुतिः
निन्दा परकृतिः पुराकल्प इति भेदादर्थवादचातुर्विध्योक्तिः

विधिविहितस्यानुकथनमनुवादइत्यनुवादलक्षणम् । वेदै-
कदेशविषहरमन्त्रादेः आरोग्यार्थौषधादिप्रतिपादका-
युर्वेदभागस्य संवादिफलकत्वेन तद्दृष्टान्तेन इतरवेद-
भागस्य प्रामाण्यव्यवस्थापनम् । २अ० १आह्निके एते
पदार्थाः । ऐतिह्यार्थापत्तिसम्भवाभावरूपाणामतिरिक्तप्र-
माणत्वमाशङ्क्य ऐतिह्यस्य शब्देऽन्तर्भावः अर्थापत्तिसम्भवाभा-
वानाञ्चानुमानेऽन्तर्भाव इति समर्थनम् । अभावस्य प्रमेयत्व-
व्यवस्थापनम् । शब्दस्यानित्यताव्यवस्थापनम् । शब्दस्य घटा-
द्याश्रयकत्वनिराकरणम् । व्याकरणविधौ वर्णानां विकारपक्ष-
निराकरणेनादेशपक्षव्यवस्थापनम् । वर्णानामविकारित्वे-
ऽपि गुणान्तरापत्त्युपमर्द्दह्रासवृद्धिलेशश्लेषैः विकारव्यवहार
इति व्यवस्थापनम् । तत्र उदात्तेऽनुदात्तत्वं गुणान्तरापत्तिः ।
उपमर्द्दो धर्म्मिनिवृत्तिः यथा अस्तेर्भूः । ह्रासः दीर्घस्य
ह्रस्वता, वृद्धिर्ह्रस्वस्य दीर्घता, लेश एकदेशविकृतिः यथा अस्ते-
रल्लोपः । श्लेषः आगम इडादि । एतैर्विकारव्यवहारः ।
पदलक्षणम् । जात्यादीनां प्रत्येकं पदार्थत्वपक्षं निराकृत्य
जात्याकृतिव्यक्तीनां समुदितानां पदार्थत्वव्यवस्थापनम् ।
व्यक्त्याकृतिजातीनां लक्षणानि एते २अ० २आह्निक
गतार्थाः । इन्द्रियचैतन्यवादनिराकरणम् । भूतचैतन्य-
वादनिराकारणम् उभयगोलकेनेत्रैक्यव्यवस्थापनम् । आ-
त्मन इन्द्रियभेदे युक्तिप्रदर्शनम् । मनस आत्मत्वनिराकरणम् ।
आत्मनित्यतासाधनम् । मनुष्यदेहस्य पार्थिवत्वसाधनम् ।
तस्य पार्थिवाप्यतैजसत्वमतोपन्यासः चातुर्भौतिकत्वमतो-
पन्यासः पाञ्चभौतिकत्वमतोपन्यासः । इन्द्रियाणां
गोलकातिरिक्तत्वस्य व्यवस्थापनम् । तेषामाहङ्कारिकत्वनि-
राकरणेन भौतिकत्वव्यवस्थापनम् । इन्द्रियाणामप्रत्यक्षत्वे
ऽप्यनुमेयताव्यवस्थापनम् । चक्षुषः प्राप्यकारित्वसाधनम् ।
इन्द्रियैकत्वमाशङ्क्य तेषां पञ्चत्वसाधनम् । भूतानां विशेष-
गुणाः तेषाञ्चैकैकेन्द्रियग्राह्यतेति निरूपणम् । प्राणादीना-
मनुद्भूतगन्धादिसाधनम् । ३अ० १म आह्निकगतार्थाः ।
सांख्यमतसिद्धबुद्धेर्नित्यत्वनिराकरणम् मनसोऽणुत्वेन-
ज्ञानानां क्रमिकत्वसाधनम् । मनसोविभुत्वे गत्यभावप्रसङ्गेन
सर्वेन्द्रियैः सर्वदासम्बन्धापत्त्या च सर्वविषयकज्ञानापत्तिदो-
षात् विभुत्वनिरासः । भावानां नियमेन क्षणिकत्वपक्षख-
ण्डनम् । परिणामवादखण्डनम् । इन्द्रियार्थयोरन्वयव्यतिरे-
कसत्त्वेऽपि ज्ञानस्य न तयोर्धर्म्मत्वं किन्तु आत्मधर्म्म-
त्वमिति समर्थनम् । ज्ञानाऽनित्यत्वसाधनम् स्मरणायौगपद्ये
कारणप्रदर्शनम् । ज्ञानवत् इच्छादीनामात्मधर्म्म-